# Kurustutih or Lakaravibhakti Ekata Stutih

# કુરુસ્તુતિઃ અથવા લકારવિભક્ત્યેકતાસ્તુતિઃ

## Document Information

Text title : Kuru Stuti (Lakaravibhaktyekata Stuti)

File name : kurustutiHlakAravibhaktyekatAstutiH.itx

Category : vishhnu, vAdirAja, vishnu, stuti

Location : doc_vishhnu

Author : vAdirAjayati

Proofread by : Jayalakshmi Jayaraman, Revathy R.

Latest update : May 26, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 26, 2024

*sanskritdocuments.org*

# Kurustutih or Lakaravibhakti Ekata Stutih

# કુરુસ્તુતિઃ અથવા લકારવિભક્ત્યેકતાસ્તુતિઃ

વ્યાકુર્વનિલસચ્છાસ્ત્રં સ્વીકુર્વસ્યૈવ સન્મતમ્ ।
હીકર્વન્યમતાચાર્યાન્ મા કર્વચ્ચ્યતવિસ્મૃતિમ્ ॥ ૧॥

ન ત્વહ્કુરુ ગુરૂન્પૂજયન્ નાહહ્કુરુ કદાચન ।
અલહ્કુરુ ચ દુગોષ્ઠી નાલહ્કુરુ હરેઃ કથામ્ ॥ ૨॥

અલહ્કુરુ તતો વાચં ન હહ્કુરુ સભાન્તરે ।
અઙ્ગીકુરુ હરિં નિત્યં નમસ્કુરુ ચ સત્કુરુ ॥ ૩॥

નાઙ્ગીકુરુ હરેઃ શ્રેષ્ઠમઙ્ગીકુરુ પરાન્સુરાન્ ।
ઊરીકુરુ સદા વ્યાખ્યામુરરીકુરુ સજ્જનાન્ ॥ ૪॥

દુરીકર ચ દુઃશાસ્વં નારીકુરુ હરેઃ કથામ્ ।
આવિષ્કુરુ ચ સત્તત્વં તિરસ્કુરુ મતાન્તરમ્ ॥ ૫॥

પુરસ્કુરુ શુભશ્રેણીમધઃકુરુ ચ દુષ્કૃતમ્ ।
અન્તઃકુરુ હરેશ્ચિન્તાં બહિષ્કુરુ કલેર્ભટાન્ ॥ ૬॥

પરાકુરુ પરાર્થાશાં નિરાકુરુ નિરાક્રિયામ્ ।
સ્થિરીકુરુ મનઃ કૃષ્ણે તરીકુરુ ચ તત્પદમ્ ॥ ૭॥

ધિકરુ શ્રુતિનિન્દાદીન્ ન્યકુરૂદરપૂરણમ્ ।
ત્રિઃકુરુ સ્નાનસન્ધ્યાઆઃ સ્વઃકુરુ સ્વકરે સ્થિતમ્ ॥ ૮॥

ઉરઃ કુરુ પુરં વિષ્ણોઃ શિરઃ કર્વસ્ય વન્દને ।
ગિરઃ કુરુ સ્તુતાવેવં ધુરઃ સર્વાઃ પરિષ્કુરુ ॥ ૯॥

સંસ્કર્વિત્થં ભવજ્જન્મ કૈહ્કુયં કુરુ માપતેઃ ।
તં કુરુ સ્વવરં ભક્ત્યાઽસ્તહ્કુરુગ્રં ભવાર્ણવમ્ ॥ ૧૦॥

સદોપકુરુ સાધૂનાં નૈવાપકુરુ કસ્યચિત્ ।
નાથૈર્વિકુરુ કુત્રાપિ ગુરોઃ પ્રતિકુરુ પ્રિયઃ ॥ ૧૧॥

સ્વીકુરુ શ્રીમદાચાર્યભાષ્યામૃતરસં સદા ।
ફૂત્કુર્વપરભાષ્યાર્થતૂલાનિ ચ પદે પદે ॥ ૧૨॥

શ્રુતં મતં હૃદિ ધ્યાતં સાક્ષાત્કુરુ હરિં પ્રભુમ્ ।
પ્રસન્નીકુરુ મુક્તીશ્ચ સિદ્ધાઃ કુરુ ચતુર્વિધાઃ ॥ ૧૩॥

મુક્તોઽપ્યશ્વાસ્યપુર્યસ્ય પરિચર્યાં મુદા કુરુ ।
બન્દીકુરુ હરેભક્તિં મન્દીકુરુ પુનર્ભવમ્ ॥ ૧૪॥

હર્યેકનિષ્ઠતાસિધ્યૈ વાદિરાજો હરેઃ સ્તુતૌ ।
લકારસ્ય વિભક્તેશ્ચ ધાતોરપ્યેકતાં વ્યધાત્ ॥ ૧૫॥

ઇતિ શ્રીમદ્વાદિરાજપૂજ્યચરણવિરચિતા
(લકારવિભક્તયેકતા) કુરુસ્તુતિઃ સમ્પૂર્ણામ્ ।

ભારતીરમણમુખ્યપ્રાણાન્તર્ગત શ્રીકૃષ્ણાર્પણમસ્તુ ।

Proofread by Jayalakshmi Jayaraman

---

*Kurustutih or Lakaravibhakti Ekata Stutih*

pdf was typeset on May 26, 2024

Please send corrections to *sanskrit@cheerful.com*